**आदर्शप्रश्नपत्रम् – 2019-20**

**कक्षा – XII**

**संस्कृतम् (ऐच्छिकम्) कोड सं – 022)**

Sanskrit Elective (022)

**समयः – होरात्रयम्** **अङ्कयोजना** **पूर्णाङ्काः – 80**

**अवधातव्यम् -**

1. अस्याम् अङ्कयोजनायां प्रदत्तानि उत्तराणि निदर्शात्मकानि सन्ति। प्रदत्तानि उत्तराणि अतिरिच्यापि सन्दर्भानुसारम् अन्यानि उत्तराणि भवितुम् अर्हन्ति।
2. **यदि छात्रः अतिरिक्त-प्रश्नानाम् उत्तराणि लिखति तर्हि छात्रहिताय यत्र अधिकाः अङ्काः दातुं शक्यन्ते तादृशानां प्रश्नानां मूल्याङ्कनं करणीयम्।** यथा चित्रवर्णने पञ्चवाक्यानां लेखनम् अभीष्टं परं छात्रः यदि सप्तवाक्यानि लिखतितर्हि तत्र केवलं प्रथम-पञ्चवाक्यानां न अपितु यानि वाक्यानि उत्तमानि, तेषां मूल्याङ्कनं करणीयम्।
3. अनुच्छेदे श्लोके वा आधारिताः प्रश्नाः अवबोधात्मकाः सन्ति। अतः विद्यार्थिनः अनुच्छेदे प्रदत्तशब्दानां स्थाने समभाव-पर्यायवाची-शब्दानां प्रयोगं कर्तुं शक्नुवन्ति। तदर्थम् अङ्काः देयाः। यदि विद्यार्थिनः उत्तरदान-समये समुचितानां विभक्तीनां वचनानां प्रयोगं न कुर्वन्ति तर्हि अंशतः अङ्काः कर्तनीयाः न तु सम्पूर्णाङ्काः।
4. त्रुटिपूर्णवर्तन्यै व्याकरणात्मक-प्रयोगाय च अनुपाततः अङ्काः कर्तनीयाः न तु सम्पूर्णाङ्काः।
5. आंशिक-दृष्ट्या समुचितेभ्यः उत्तरेभ्यः अपि अङ्काः देयाः।
6. 'ख' खण्डे (रचनात्मक-कार्ये) वाक्यरचना प्रमुखा न तु वाक्यसौन्दर्य-तत्त्वम्। अतः आंशिकवाक्यशुद्धये अपि अङ्काः देयाः।
7. **प्रश्ननिर्माणस्य प्रश्ने ½ अङ्कः वाक्यलेखनाय अस्ति, ½ अङ्कश्च प्रश्नवाचकचिह्नाय। परं सम्यक्-प्रश्ननिर्माणं <u>तदा एव प्रश्नवाचकचिह्नस्य कृते अङ्काः प्रदेयाः</u>।)**

**खण्डः – क**

**अपठितांश - अवबोधनम्** 10 **अङ्काः**

1. **अधोलिखितं गद्यांशं पठित्वा प्रदत्तान् प्रश्नान् संस्कृतेन उत्तरत -**

**(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)** 1 x 2 = 2

(i) संस्कृतसम्भाषणम्

(ii) अन्यभाषानुरागः

(iii) जनभाषापदम्

**(आ) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)** 2 x 2 =4

(i) विद्यालये समाजे च दैनिकव्यवहारे अधिकाधिकं संस्कृतसम्भाषणं करणीयम्।

(ii) किं वयं संस्कृताध्ययनतत्पराः संस्कृतानुरागिणः अनया संस्कृतभाषया भाषामहे।

(iii) यावद्वयं अन्यभाषामाध्यमेन संस्कृतस्य अर्थावबोधने संलग्नाः भविष्यामः तावत् संस्कृतभाषया वक्तुं समर्थाः नैव भवेम।

**(इ) अस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत।** 1 x 1 = 1

संस्कृतसम्भाषणं नातिकठिनम् अधिकाधिकं संस्कृतसम्भाषणं करणीयम्

अथवा अन्यः कश्चित् समुचितः शीर्षकः

**(ई) यथानिर्देशम् उत्तरत - (केवलं प्रश्नत्रयम्)** 1 x 3 = 3

(i) संस्कृतभाषायै

(ii) विषयः

(iii) अधिकाधिकम्

(iv) वयम्

**खण्डः – ख**

**रचनात्मक–कार्यम्** 15 **अङ्काः**

2. **अधोलिखित-पदेषु कानिचित् पञ्चपदानि आधृत्य पञ्चवाक्यानि संस्कृतेन लिखत –** 1x5=5

विषयप्रतिपादनार्थं 2½ अङ्काः, वाक्यशुद्ध्यर्थं च 2½ अङ्काः प्रदातव्याः।

3. **प्रदत्ततथ्यानां सहातया अधोलिखितं विषयम् अधिकृत्य संस्कृतेन अनुच्छेदं लिखत –** 5

प्रदत्तविषयमधिकृत्य तथ्यानां सहायतया संस्कृतेन लिखिते अनुच्छेदे विषयप्रतिपादनार्थं 2½ अङ्काः वाक्यशुद्ध्यर्थञ्च 2½ अङ्काः प्रदातव्याः।

4. **निम्नलिखितवाक्येषु केषाञ्चन पञ्चवाक्यानां संस्कृतेन अनुवादं कुरुत -** 1 x 5 = 5

(i) देवेन्द्रः मम मित्रस्य नीरवस्य मित्रम् अस्ति।

(ii) सः गायने प्रथमं स्थानम् अलभत / प्राप्तवान्।

(iii) नीरवः देवेन्द्रः च श्वः मम गृहम् आगमिष्यतः।

(iv) सायङ्काले मम गृहे सङ्गीतस्य कार्यक्रमः भविष्यति।

(v) यूयम् अपि आगच्छत।

(vi) वयं सङ्गीतसन्ध्यायाः आनन्दं लप्स्यामहे।

(vii) तत्र मम आचार्याः अपि आगच्छेयुः।

## खण्डः – ग

## पठितांश - अवबोधनम् 40 अङ्काः

5. अधोलिखितं गद्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत –

(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) 1 X 2 = 2

(i) अपगतमले

(ii) अवधीरयन्तः

(iii) उपदेशानाम्

(आ) पूर्णवाक्येन उत्तरत – ( केवलं प्रश्नद्वयम् ) 1 ½ X 2 = 3

(i ) गुरूपदेशः नाम अखिलमलप्रक्षालनक्षमम् अजलं स्नानम्।

(ii) जनः भयात् राजवचनम् अनुगच्छति।

(iii) गुरूपदेशः अतिमलिनम् अपि दोषजातं हरति।

6. अधोलिखितं पद्यं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत -

(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) 1 × 2 = 2

(i) कूपखननम्

(ii) आत्मश्रेयसि

(iii) स्वस्थम्

(ब) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) 1½ × 2 = 3

(i) यावत् शरीरं स्वस्थं , जरा च दूरे ,इन्द्रियशक्तिः अप्रतिहता , आयुषः च क्षयः न भवेत् तावद् विदुषा महान् प्रयत्नः करणीयः।

(ii) आत्मकल्याणाय अप्रतिहता इन्द्रियशक्तिः आवश्यकी।

(iii ) आयुषः क्षयात् पूर्वं विद्वान् जनः प्रयत्नं कुर्यात्।

7. अधोलिखितं नाट्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत –

(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) 1 x 2 = 2

(i) कथयितव्यम्

(ii) कौशल्या

(iii) अश्वः

(ब) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम् ) 1 ½ x 2 = 3

(i) भगवतः सुगृहीतनामधेयस्य वाल्मीकेः।

(ii) अश्वोऽश्वः इति पशुसमाम्नाये साङ्ग्रामिके च पठ्यते।

(iii) अश्वोऽश्वः इति कोऽपि भूतविशेषो बटुभिः जनपदेष्वनुश्रूयते।

8. **पदानां समुचितार्थैः मेलनं कृत्वा लिखत – (केषाञ्चित् चतुर्णाम्)** ½x 4=2

(i) समाः – वर्षाणि

(ii) अशेषम् - सम्पूर्णम्

(iii) उत्सङ्गे - अङ्के

(iv) वैदग्ध्यम् – पाण्डित्यम्

(v) विधात्रा - ब्रह्मणा

(vi) समाहूताः - आमन्त्रिताः

9. **अधोलिखितेषु वाक्येषु रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत –(केषुचित् चतुर्षु)** 1 × 4 = 4

(i) केषां हिंसावृत्तिस्तु निरवधिः?

(ii) मनुष्याः कीदृशाः दुःखेन समयम् अतिवाहयन्ति?

(iii) भगवान् कं दीर्घजीवनं कारयतु?

(iv) शिववीरस्य विश्वासपात्रं कुत्र प्रयाति?

(v) कस्मै व्ययार्थं रत्नचतुष्टयं दास्यामि?

(vi) जनकादयः केन एव संसिद्धिम् आस्थिताः?

10. **अधोलिखितभावार्थे रिक्तस्थानपूर्तिं मञ्जूषापद सहायतया कुरुत – (कस्यचिदेकस्य)** 1 × 3 = 3

**(अ) भावार्थः –** संसारे सामान्याः जनाः विशिष्टानां (i) श्रेष्ठानां जनानां व्यवहारस्य एव अनुकरणं कुर्वन्ति। श्रेष्ठाः जनाः यादृशम् (ii) आचरणं कुर्वन्ति अन्ये जनाःअपि तेषाम् आचरणम् एव (iii) प्रामाणिकं मत्वा तद्वदेव आचरन्ति।

**(आ)**

**भावार्थः –** विवेकपूर्णनिर्णये हंसस्य एव ( i ) वैशिष्ट्यम् अस्ति।हंसवत् ज्ञानवान् विवेकी च जनः एव यदि स्वकर्तव्यपालने (ii) आलस्यम् करिष्यति तदा अन्ये ये विवेकिनः न सन्ति तेभ्यः (iii) कर्तव्यपालनस्य का आशा भवेत्। अतः विवेकिनो ज्ञानिनो वा जनाः स्वकर्तव्यं निष्ठया पालयेयुः।

11. **अधोलिखित-अन्वये रिक्तस्थानानि पूरयत - (केवलं पद्यमेकम्)** 1 x 3 = 3

**(अ)**

**अन्वयः –** अनर्घशीलः यशसा प्रकाशः सः (i) आतिथेयः वीतहिरण्मयत्वात् मृन्मये पात्रे अर्घ्यं (ii) निधाय श्रुतप्रकाशं (iii) अतिथिं प्रति उज्जगाम।

**अथवा**

**अन्वयः –** त्वं नियतं कर्म (i) कुरु अकर्मणः हि कर्म (ii) ज्यायः। अकर्मणःच ते (iii) शरीरयात्रा अपि न प्रसिद्धयेत्।

12. **यथानिर्देशम् उत्तरत –**

**(अ) कर्तृपदं क्रियापदं च चिनुत - ( कस्यचिदेकस्य )** 1

(i) किन्तुः , जनयति

(ii) अश्वत्थदेव , विसर्जयामास

**(आ) विशेषणं विशेष्यं च चिनुत - (केवलं एकम् )** 1

(i) अर्धाधिकम् , धनम्

(ii) दोधूयमानाः , वृक्षशाखाः

**(इ) वाक्ये प्रयुक्तं सर्वनामपदं कस्मै प्रयुक्तम् ? (केवलम् एकम्)** 1

(i) शिववीराय

(ii) हंसाय

**(ई) अधोलिखितं वाक्यं कस्मात् ग्रन्थात् गृहीतं कश्च तस्य लेखकः? (केवलम् एकम्)** 1

(i) श्रीमद्भगवद्गीता / गीता – व्यासः

(ii) उत्तररामचरितम् – भवभूतिः

**(उ) कः कं कथयति? (केवलम् एकम् )** 1

(i) योगाचार्यः – छात्रान्

(ii) पुरुषः – लवम्

13. **(अ) अधोलिखितेषु कविषु केषाञ्चन चतुर्णां कवीनाम् एकैकस्य काव्यस्य नाम लिखत-** 1×4= 4

माघः – शिशुपालवधम् , भवभूतिः – उत्तररामचरितम् / महावीरचरितम्/ मालतीमाधवम्, अम्बिकादत्तः व्यासः – शिवराजविजयम्

दण्डी — दशकुमारचरितम् , भासः – स्वप्नवासवसत्तम् इत्यादिः ,

बाणभट्टः – कादम्बरी/ हर्षचरितम्

**(आ) अधोलिखितासु रचनासु कासाञ्चित् चतसृणां लेखकानां नामानि लिखत -** 1 x 4 = 4

नीतिशतकम् – भर्तृहरिः

पञ्चतन्त्रम् – विष्णुशर्मा

अभिज्ञानशाकुन्तलम् – कालिदासः

गङ्गालहरी – पण्डितराजः जगन्नाथः

मेघदूतम् – कालिदासः

गीतगोविन्दम् – जयदेवः

**खण्डः – घ**

**छन्दोऽलङ्कारपरिचयः 15 अङ्काः**

14. **(अ) प्रश्नान् उत्तरत – ( केवलं द्वयम् )** 1 x 2 = 2

(i) तगणः – ऽ ऽ ।

(ii) रगणः - ऽ । ऽ

(iii) भगणः -ऽ । ।

**(आ) अधोलिखितपरिभाषाः पूरयत – ( केवलं द्वे )** 1 x 2 = 2

(i) उपेन्द्रवज्रा जतजास्ततो गौ ।

(ii) उक्ता वसन्ततिलका तभजाजगौगः।

(iii) जतौ तु वंशस्थमुदीरितं जरौ।

**( इ ) एकस्य छन्दसः उदाहरणं लिखत –** 1 x 1 = 1

(i) इन्द्रवज्रा – प्रातः प्रयाणाभिमुखाय तस्मै।

(ii) मालिनी – आज्ञा कीर्तिः पालनं ब्राहमणानाम्।

(iii) अनुष्टुप् – उद्धरेदात्मनात्मानम्।

**(ई) अधोलिखित–पङ्क्तिषु किं किं छन्दः? ( केवलं त्रयम् )** 1 x 3 = 3

(i) वसन्ततिलका

(ii) वंशस्थम्

(iii) अनुष्टुप्

(iv) उपेन्द्रवज्रा

15. **(अ) कस्यचिदेकस्य शब्दालङ्कारस्य सोदाहरणं लक्षणं लिखत -** 2 x 1 = 2

**श्लेषः**

लक्षणम् – श्लिष्टैः पदैरनेकार्थाभिधाने श्लेष इष्यते।

उदाहरणम् –उच्छलद्-भूरि-कीलालः शुशुभेवाहिनी-पतिः

**अनुप्रासः**

लक्षणम् – वर्णसाम्यम् अनुप्रासः।

उदाहरणम् – केषां नैषा कथय कविता कामिनी कौतुकाय।

**(आ) केवलमेकस्य अर्थालङ्कारस्य लक्षणमुदाहरणं च लिखत -** 3 × 1 = 3

**उपमा**

लक्षणम् – साधर्म्यम् उपमा भेदे।

उदाहरणम – शब्दार्थौ सत्कविरिव द्वयं विद्वानपेक्षते।

**रूपकम्**

लक्षणम् – तद्रूपकम् अभेदो य उपमानोपमेययोः।

उदाहरणम् – वत्सायाः मे वध्वाः मुखचन्द्रेणापि संवदत्येव।

**( इ ) अधोलिखितपङ्क्तिषु के अलङ्काराः? (केवलं द्वयम्)** $1 \times 2 = 2$

(i) रूपकम्  (ii) उपमा  (iii) अनुप्रासः